# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| विषयः – स्वामिनारायणवेदान्तः (J) | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | सन्दर्भग्रन्थः – छान्दोग्यबृहदारण्यकोपनिषदौ (गोपालानन्दभाष्यसहिते) | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ बाह्यम् अग्न्यादिषु भूतानां त्रिवृत्तकृतत्वं निरूपयत।

२ 'तदैक्षत बहुस्यां प्रजायेय' इतीमं मन्त्रं गोपालानन्दमुनिविरचितभाष्यानुगुणं व्याख्यात।

३ तेजोऽबन्नानां त्रिवृत्करणप्रक्रियां यथाग्रन्थं लिखत।

४ 'सदेव सोम्येदमग्र आसीत्' इति वाक्यार्थं गोपालानन्दमुनिविरचितभाष्यानुगुणं स्पष्टयत।

**प्रश्नः २** छान्दोग्योपनिषदः षष्ठप्रपाठके प्रोक्तां श्वेतकेतूद्दालकयोः आख्यायिकामुपपादयत।

**प्रश्नः ३** ब्रह्मजगतोः उपादानोपादेयभावं प्रथमखण्डमुपलक्ष्य सदृष्टान्तं विवृणुत।

**प्रश्नः ४** स्वर्गलोकफलस्य अनित्यत्वम् अष्टमप्रपाठकान्तर्गतप्रथमखण्डमनुसृत्य लिखत।

**प्रश्नः ५** छान्दोग्योपनिषदि प्रोक्तां दहरविद्यां यथाग्रन्थमुपपादयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ परब्रह्मणः मूर्तामूर्तात्मकं शरीरद्वयं भाष्यानुगुणं परिचाययत।

२ 'स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा' इतीमं मन्त्रं भाष्यानुगुणं व्याख्यात।

३ 'सर्वं ब्रह्मात्मकम्' इति सदृष्टान्तं निरूपयत।

४ 'स वा एष महानज आत्माऽजरोऽमृतोऽभयो ब्रह्म' इतीमं मन्त्रं भाष्यानुसारं विमृशत।

**प्रश्नः ७** बृहदारण्यकोपनिषदः चतुर्थब्राह्मणोक्तं याज्ञवल्क्यमैत्रेयीसंवादं विवृणुत ।

**प्रश्नः ८** बृहदारण्यकोपनिषदः द्वितीयाध्यायस्य पञ्चमब्राह्मणस्य सारभागं सङ्गृह्णीत ।

**प्रश्नः ९** बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य तृतीयब्राह्मणस्य सारमुपवर्णयत ।

**प्रश्नः १०** सदृष्टान्तं जीवानां देहान्तरप्राप्तिप्रकरणं बृहदारण्यकोपनिषदमाधारीकृत्य वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ सद्विद्या कस्याम् उपनिषदि समायाति ?

२ छान्दोग्योपनिषदः षष्ठतमे प्रपाठके कति खण्डाः सन्ति ?

३ उद्दालकः कस्य पुत्रः आसीत् ?

४ 'अननूच्य' इति शब्दस्य कोऽर्थः ?

५ किं नाम विज्ञानम् ?

६ छान्दोग्योपनिषदः अष्टमप्रपाठकस्य प्रथमखण्डे कति मन्त्राः सन्ति ?

७ दहरविद्या छान्दोग्योपनिषदः कस्मिन् प्रपाठके समायाति ?

८ सर्वे कल्याणगुणाः कुत्र समाहिताः ?

९ बृहदारण्यकोपनिषत् कस्मिन् वेदे दृग्गोचरीभवति ?

१० बृहदारण्यकोपनिषदि कति अध्यायाः सन्ति ?

११ किं नाम मूर्तम् ?

१२ 'अथात आदेशो नेति नेति' इत्यत्रोक्तस्य 'आदेशः' इति शब्दस्य कोऽर्थः ?

१३ मधुविद्या कस्याम् उपनिषदि प्रोक्ता ?

१४ मिथिलायाः वैदेहः कः ?

१५ बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य तृतीये ब्राह्मणे कयोः संवादः वर्तते ?

****